कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ चतुर्थ काण्डे सप्तमः प्रश्नः॥

हरिः ओम्॥ अग्नाविष्णू सजोषसेमा वर्धन्तु वांगिरः। द्युम्नैर्वाजेभिरा गतम्॥ वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपान- [१] श्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूग्ंषि च मे शरीराणि च मे॥ [२]

अपानस्तनूश्च मेऽष्टादश चा॥4.7.1॥

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च [३] मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लुप्तं च मे क्लुप्तिश्च मे मतिश्च मे सुमतिश्च मे॥[४]

जगच्चर्धिश्चतुर्दश चा॥4.7.2॥

शंच मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च [५] मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे॥[६]

विश्वं च शयनमष्टौ चा॥4.7.3॥

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे शपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च [७] मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे॥[८]

विभु च मसुराश्चतुर्दश चा॥4.7.4॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च [९] मेऽकृष्टपच्यं च मे ग्राम्याश्च

मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे॥[१०]

कृष्टपच्यञ्चाऽष्टाचत्वारिग्ं शच्च॥4.7.5॥

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च [११] म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे॥[१२]

त्वष्टा च द्यौश्च म एकविग्ं शतिश्च॥4.7.6॥

अग्ंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाग्ंशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च [१३] मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पालीवतश्च मे हारियोजनश्च मे॥[१४]

ऋतुग्रहाश्च चतुस्त्रिग्ं शच्च॥4.7.7॥

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे॥[१५]

गृहाश्च षोडश च॥4.7.8॥

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तां ऋक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम्॥[१६]

दीक्षाऽष्टादश च॥4.7.9॥

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च [१७] मे वेहच्च मेऽनड्वाञ्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताग् श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्॥[१८]

ऋषभश्च चत्वारिग्ंशच्च॥4.7.10॥

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविग्ंशतिश्च मे त्रयोविग्ंशतिश्च मे पञ्चविग्ंशतिश्च मे सप्तविग्ंशतिश्च मे नवविग्ंशतिश्च म एकत्रिग्ंशच्च मे त्रयस्त्रिग्ंशच्च [१९] मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विग्ंशतिश्च मे चतुर्विग्ंशतिश्च मेऽष्टाविग्ंशतिश्च मे द्वात्रिग्ंशच्च मे षट्त्रिग्ंशच्च मे चत्वारिग्ंशच्च मे चतुश्चत्वारिग्ंशच्च मेऽष्टाचत्वारिग्ंशच्च मे वाजश्च प्रसवश्चाऽपिजश्च ऋतुश्च सुवश्च मूर्धा च व्यश्नियश्चाऽऽन्त्यायनश्चाऽन्त्यश्च भौवनश्च भुवनश्चाऽधिपतिश्च॥[२०]

त्रयस्त्रिग्ंशच्च व्यश्निय एकादश च॥4.7.11॥

वाजो नः सप्त प्रदिशश्चतस्रो वा परावतः। वाजो नो विश्वैर्देवैर्धनसाताविहाऽवतु॥ विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः। विश्वे नो देवा अवसाऽऽगमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ॥ वाजस्य प्रसवं देवा रथैर्याता हिरण्ययैः। अग्निरिन्द्रो बृहस्पतिर्मरुतः सोमपीतये॥ वाजेवाजेऽवत वाजिनो नो धनेषु [२१] विप्रा अमृता ऋतज्ञाः। अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥ वाजः पुरस्तादुत मध्यतो नो वाजो देवाग्ं ऋतुभिः कल्पयाति। वाजस्य हि प्रसवो नन्नमीति विश्वा आशा वाजपतिर्भवेयम्॥ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाम्। पयस्वतीः प्रदिशः सन्तु मह्यम्॥ सं मा सृजामि पयसा घृतेन सं मा सृजाम्यप [२२] ओषधीभिः। सोऽहं वाजग्ं सनेयमग्ने॥ नक्तोषासा समनसा विरूपे धापयेते शिशु मेकग्ं समीची। द्यावा क्षामा रुक्मो

अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाः॥ समुद्रोऽसि नभस्वानार्द्रदानुः शं भूर्मयोभूरभि मा वाहि स्वाहा मारुतोऽसि मरुतां गणः शं भूर्मयोभूरभि मा वाहि स्वाहाऽवस्युरसि दुवस्वाञ्छभूर्मयोभूरभि मा वाहि स्वाहा॥[२३]

धर्नेष्वपो दुवस्वाञ्छंभूर्मयोभूरभि मा द्वे च॥4.7.12॥

अग्निं युनज्मि शवसा घृतेन दिव्यग्ं सुपर्णं वयसा बृहन्तम्। तेन वयं पतेम ब्रध्नस्य विष्टपग्ं सुवो रुहाणा अधि नाक उत्तमे ॥ इमौ ते पक्षावजरौ पतत्रिणो याभ्याग्ं रक्षाग्स्यपहग्ग्स्यग्ने। ताभ्यां पतेम सुकृतामु लोकं यत्रर्षयः प्रथमजा ये पुराणाः॥ चिदसि समुद्रयोनिरिन्दुर्दक्षः श्येन ऋतावा। हिरण्यपक्षः शकुनो भुरण्युर्महान्थ्सधस्थे ध्रुवः [२४] आ निषत्तः॥ नमस्ते अस्तु मा मा हिग्ंसीर्विश्वस्य मूर्धन्नधि तिष्ठसि श्रितः। समुद्रे ते हृदयमन्तरायुर्द्यावापृथिवी भुवनेष्वर्पिते॥ उद्नो दत्तोदधिं भिन्त दिवः पर्जन्यादन्तरिक्षात्पृथिव्यास्ततो नो वृष्ट्याऽवत। दिवो मूर्धाऽसि पृथिव्या नाभिरूर्गपामोषधीनाम्। विश्वायुः शर्म सप्रथा नमस्पथे॥ येनर्षयस्तपसा सत्र [२५] मासतेन्धाना अग्निग्ं सुवराभरन्तः। तस्मिन्नहं नि दधे नाके अग्निमे तं यमाहुर्मनवः स्तीर्णबर्हिषम्॥ तं पत्नीभिरनु गच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः। नाकं गृह्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः॥ आ वाचो मध्यमरुहद्भुरण्युरयमग्निः सत्पतिश्चेकितानः। पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदं कृणुते [२६] ये पृतन्यवः॥ अयमग्निर्वीरतमो वयोधाः सहस्रियो दीप्यतामप्रयुच्छन्। विभ्राजमानः सरिरस्य मध्य उप प्र यात दिव्यानि धाम॥ सं प्र च्यवध्वमनु सं प्र याताऽग्ने पथो देवयानान् कृणुध्वम्। अस्मिन्थ्सधस्थे अध्युत्तरस्मिन्विश्वे देवा

यजमानश्च सीदत॥ येना सहस्रं वहसि येनाऽग्ने सर्ववेदसम्। तेनेमं यज्ञं नो वह देवयानो य [२७] उत्तमः॥ उद्बुध्यस्वाऽग्ने प्रति जागृह्येनमिष्टापूर्ते सग्ं सृजेथामयंच । पुनः कृण्वग्ग्स्त्वा पितरं युवानमन्वातागंसीत्त्वयि तन्तुमेतम्॥ अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः। तं जानन्नग्न आ रोहाऽथा नो वर्धया रयिम्॥[२८]

धृवस्सत्रंकृणुते यस्सप्तत्रिग्ंशच्च॥4.7.13॥

ममाऽग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तनुवं पुषेम। मह्यं नमन्तां प्रदिशश्च तस्रस्त्वयाऽध्यक्षेण पृतना जयेम॥ मम देवा विहवे सन्तु सर्व इन्द्रावन्तो मरुतो विष्णुरग्निः। ममाऽन्तरिक्षमुरु गोपमस्तु मह्यं वातः पवतां कामे अस्मिन्न्॥ मयि देवा द्रविणमा यजन्तां मय्याशीरस्तु मयि देवहूतिः। दैव्या होतारा वनिषन्त [२९] पूर्वेऽरिष्टाः स्याम तनुवा सुवीराः॥ मह्यं यजन्तु मम यानि हव्याऽऽकूतिः सत्या मनसो मे अस्तु। एनो मा नि गां कतमच्चनाऽहं विश्वे देवासो अधि वोचता मे॥ देवीः षडुर्वीरुरु णः कृणोत विश्वे देवास इह वीरयध्वम्। मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन्न्॥ अग्निर्मन्युं प्रतिनुदन्पुरस्ता– [३०] ददब्धो गोपाः परि पाहि नस्त्वम्। प्रत्यञ्चो यन्तु निगुतः पुनस्तेऽमैषां चित्तं प्रबुधा वि नेशत्॥ धाता धातृणां भुवनस्य यस्पतिर्देवग्ं सवितारमभिमातिषाहम्। इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पान्तु यजमानं न्यर्थात्॥ उरुव्यचा नो महिषः शर्म यग्ंसदस्मिन् हवे पुरुहूतः पुरुक्षु। स नः प्रजायै हर्यश्व मृडयेन्द्र मा [३१] नो रीरिषो मा परा दाः॥ ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान्। वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन्न्॥ अर्वाञ्चमिन्द्रममुतो हवामहे यो

गोजिद्धनजिदश्वजिद्यः। इमं नो यज्ञं विहवे जुषस्वाऽस्य कुर्मो हरिवो मे दिनं त्वा॥ [३२]

वनिषन्त पुरस्तान्मा त्रिचत्वारिग्ं शच्च॥4.7.14॥

अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पाञ्चजन्यं बहवः समिन्धते। विश्वस्यां विशि प्रविविशिवाग्ं समीमहे स नो मुञ्चत्वग्ंहसः॥ यस्येदं प्राणन्निमिषद्यदेजति यस्य जातं जनमानञ्च केवलम्। स्तौम्यग्निं नाथितो जोहवीमि स नो मुञ्चत्वग्ंहसः॥ इन्द्रस्य मन्ये प्रथमस्य प्रचेतसो वृत्रघ्नः स्तोमा उप मामुपागुः। यो दाशुषः सुकृतो हवमुप गन्ता [३३] स नो मुञ्चत्वग्ंहसः॥ यः संग्रामं नयति सं वशी युधे यः पुष्टानि सग्ंसृजति त्रयाणि। स्तौमीन्द्रं नाथितो जोहवीमि स नो मुञ्चत्वग्ंहसः॥ मन्वे वां मित्रावरुणा तस्य वित्तग्ं सत्यौजसा दृग्ंहणा यं नुदेथे। या राजानग्ं सरथं याथ उग्रा ता नो मुञ्च तमागसः॥ यो वाग्ं रथ ऋजुरश्मिः सत्यधर्मा मिथुश्च रन्तमुपयाति दूषयन्न्। स्तौमि [३४] मित्रावरुणा नाथितो जोहवीमि तौ नो मुञ्च तमागसः॥ वायोः सवितुर्विदथानि मन्महे यावात्मन्वद्बिभृतो यौ च रक्षतः। यौ विश्वस्य परिभू बभूवतुस्तौ नो मुञ्च तमागसः॥ उप श्रेष्ठा न आशिषो देवयोर्धर्मे अस्थिरन्। स्तौमि वायुग्ं सवितारं नाथितो जोहवीमि तौ नो मुञ्च तमागसः॥ रथीतमौ रथीनामह्व ऊतये शुभं गमिष्ठौ सुय मे भिरश्वैः। ययो [३५] वां देवौ देवेष्वनिशितमोजस्तौ नो मुञ्च तमागसः॥ यदयातं वहतुग्ं सूर्यायास्रि चक्रेण सग्ंसदमिच्छमानौ। स्तौमि देवावश्विनौ नाथितो जोहवीमि तौ नो मुञ्च तमागसः॥ मरुतां मन्वे अधि नो ब्रुवन्तु प्रेमां वा चं विश्वामवन्तु विशः। आशून् हुवे

सुयमानूतये ते नो मुञ्च न्त्वेनसः॥ तिग्ममायुधं वीडितग्ं सहस्वद्दिव्यग्ं शर्धः [३६] पृतनासु जिष्णु। स्तौमि देवान्मरुतो नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः॥ देवानां मन्वे अधि नो ब्रुवन्तु प्रेमां वा चं विश्वामवन्तु विश्वे। आशून् हुवे सुयमानूतये ते नो मुञ्चन्त्वेनसः॥ यदिदं माऽभिशोचति पौरुषेयेण दैव्येन। स्तौमि विश्वान्देवान्नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः॥ अनु नोऽद्याऽनुमतिर– [३७] न्विदनुमते त्वं वैश्वानरो न ऊत्या पृष्टो दिवि। ये अप्रथेताममितेभिरोजोभिर्ये प्रतिष्ठे अभवतां वसूनाम्। स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमग्ंहसः॥ उर्वी रोदसी वरिवः कृणोतं क्षेत्रस्य पत्नी अधि नो ब्रूयातम्। स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमग्ंहसः॥ यत्ते वयं पुरुषत्रा यविष्ठाऽविद्वाग्ंसश्चकृमा कच्चना [३८] ऽऽगः। कृधी स्वस्माग्ं अदितेरनागा व्येनाग्ंसि शिश्रथो विष्वगग्ने॥ यथा ह तद्वसवो गौर्यं चित्पदि षिताममुञ्चता यजत्राः। एवा त्वमस्मत्प्र मुञ्चा व्यग्ंहः प्राऽतार्यग्ने प्रतरां न आयुः॥[३९]

गन्ता दूषयन्त्थ्सौमि ययोश्शर्धोऽनुमतिरनु चन चतुस्त्रिग्ंशच्च॥4.7.15॥

अग्नेर्मन्वे यस्यैदमिन्द्रस्य यस्संग्रामग्ं सनो मुञ्चत्वग्ंहसः। मन्वे वां ता नो मुञ्चतमागसः। यो वां वायोरुप रथीतमौ यदयातमश्विनौ तौ नो मुञ्चतमागसः। मरुतां तिग्मं मरुतो देवानां यदिदं विश्वान्ते नो मुञ्चन्त्वेनसः। अनु न उर्वी द्यावापृथिवी ते नो मुञ्चतमग्ंहसो यत्ते॥ चतुरग्ंहसष्षडागसश्चतुरेनसो द्विरग्ंहसः॥

अग्नाविष्णू ज्यैष्ठ्यग्ं शंचोक्र्चाऽइमा चाऽग्निश्चाऽग्ंशुश्चेध्मश्चाऽग्निश्च गर्भाश्चैका च वाजो नोऽग्निं युनज्मि ममाऽग्नेऽग्नेर्मन्वे पञ्चदश॥15॥

अग्नाविष्णू अग्निश्च वाजो नो अदब्धो गोपा नवत्रिग्ंशत्॥39॥

अग्नाविष्णू प्रतरांन आयुः॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति चतुर्थ काण्डे सप्तम प्रश्नः॥

॥चतुर्थकाण्डः समाप्तः॥